## आसुयुवपिरपिलपित्रपिचमश्च। (१२६/२८८७)

[1]आङ्पूर्वात् सुनोतेः यु वपि रपि लपि त्रपि [2]चम इत्येतेभ्यश्च ण्यत् प्रत्ययो भवति। यतोऽपवादः। आसाव्यम्। याव्यम्। वाप्यम्। राप्यम्। लाप्यम्। [3]त्राप्यम्। [4]आचाम्यम्। अनुक्तसमुच्चयार्थश्चकारः। [5]दभि – दाभ्यम्॥

## आनाय्योऽनित्ये। (१२७/२८८८)

आनाय्यः इति निपात्यते [6]अनित्येऽभिधेये। नयते[7]राङ्पूर्वाण् ण्यदायादेशौ [8]निपात्येते। आनाय्यो दक्षिणाग्निः। रूढिरेषा। तस्मादनित्यविशेषे दक्षिणाग्नावेवा[9]वतिष्ठते। तस्य चानित्यत्वं नित्यमजागरणात्। यश्च गार्हपत्यादानीयते दक्षिणाग्निराहवनीयेन सह एकयोनिः, तत्रैतन् निपातनं, न दक्षिणाग्निमात्रे। तस्य हि योनिर्विकल्प्यते 'वैश्यकुलाद् वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद् वा' (पार. गृ. १.२.३) इति।

आनाय्योऽनित्य इति चेद् दक्षिणाग्नौ कृतं भवेत्।
एकयोनौ तु तं विद्यादानेयो ह्यन्यथा भवेत् (म. भा. २.८९)॥

## प्रणाय्योऽसम्मतौ। (१२८/२८८९)

अविद्यमाना सम्मतिरस्मिन् [10]इत्यसम्मतिः। सम्मननं सम्मतिः, सम्मतता, पूजा। प्रणाय्यः इति निपात्यतेऽसम्मतावभिधेये। प्रणाय्य[11]श्चोरः। असम्मतौ इति किम्? प्रणेयोऽन्यः। यद्येवं कथम्[12]एतत्, 'ज्येष्ठाय पुत्राय पिता ब्रह्म ब्रूयात् [13]प्रणाय्यान्तेवासिने, नान्यस्मै कस्मैचन' (छां. ३.१०.५.६) इति? सम्मतिरभिलाषोऽप्युच्यते। तदभावेन निष्कामतया असम्मतिरन्तेवासी भवति। तस्मै निष्कामाय मोक्षार्थं यतमानायान्तेवासिने प्रणाय्याय ब्रह्म ब्रूयात् इति युज्यते॥

## पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु। (१२९/२८९०)

पाय्यादयः शब्दा निपात्यन्ते यथासङ्ख्यं [14]माने हविषि निवासे सामिधेन्यां चाभिधेयायाम्। [15]पाय्य इति माङो ण्यत्प्रत्ययः, [16]आदेः पत्वं च निपात्यते माने। पाय्यं मानम् मेयम् अन्यत्। सम्पूर्वान्नयतेर्ण्यदायादेशावुपसर्गदीर्घत्वं च [17]निपात्यते। सानाय्यं हविः (तै.सं.७.५.१०३)। संनेयमन्यत्। रूढित्वाच्च हविर्विशेष एवावतिष्ठते। निपूर्वाच् चिनोतेः ण्यदायादेशावादिकुत्वं च [18]निपात्यते। निकाय्यो निवासः। निचेयम् अन्यत्। धाय्या इति धायो ण्यत् प्रत्ययो निपात्यते सामिधेनी चेत् [19]सा भवति। धाय्या [20]सामिधेनी। धेयम् अन्यत्। सामिधेनीशब्द ऋग्विशेषस्य वाचकः। तत्र च धाय्या इति न सर्वा सामिधेनी उच्यते, किं तर्हि, काचिदेव। रूढिशब्दो ह्ययम्। तथा चासामिधेन्यामपि दृश्यते, 'धाय्याः शंसत्यग्निर्नेता त्वं सोमक्रतुभिः' (ऐ. ब्रा. १२.७) इति॥

---

1. स्वादिभ्यश्च फ. 2. चमि अ. क. 3. अवत्राप्यः क, त्राप्यम् ड. 4. आचाम्यः क. ड. 5. दभेः अ. क. फ. ह. 6. अनित्ये वाच्ये अ, वाच्येऽर्थे फ. 7. धातोः इत्यधिकम् फ. 8. भवतः फ. ह. 9. भवति अ, विशस्यते फ. ह, विज्ञायते ह. 10. सोऽयम् फ. ह. 11. चौरः अ. फ. 12. एतदेव फ. 13. प्रणाय्यचान्ते° ड. 14. मानादिषु अभिधेयेषु फ. 15. पाय्य इति नास्ति फ. 16. आदिपत्वं च फ. 17. निपात्यते नास्ति फ. 18. भवति अ. 19. सा नास्ति फ. 20. सामिधेनी नास्ति फ.